दिनाङ्क :- 31.07.2025

प्रात: - 06:55

<u>राज्यसभा आपरेशन् सिन्दूर</u>

केन्द्रीय गृहमन्त्रिणा श्री-अमित शाहेन प्रतिपादितम् यत् नरेन्द्र मोदी सर्वकारस्य शासनसमये जम्मू कश्मीरः आतंकवादात् मुक्तो भविष्यति । पहलगामनगरे आतङ्कवादीनां आक्रमणस्य प्रतिक्रियारूपेण भारतस्य सशक्तं, सफलं निर्णायकं च ऑपरेशन सिन्दूर-अभियानम् इत्यस्मिन् विषये राज्यसभायां चर्चायाः उत्तरं दत्त्वा गृहमन्त्री अवदत् यत् आतङ्कवादिनः विरुद्धं कठोर-कार्याचरणं भविष्यति, आतङ्कवादस्य आधारभूतसंरचना च भूमौ ध्वस्तं भविष्यति ।

श्री-शाहः सफलस्य महादेव-अभियानस्य कृते सशस्त्रसेनानां सुरक्षासंस्थानां च भूमिकायाः प्रशंसाम् अकरोत् यस्मिन् संयुक्त-सैन्यबलेन पहलगाम-आतङ्की-आक्रमणे सम्बद्धाः त्रयः आतङ्कवादिनः मृत्युकूपं प्रेषिताः ।

गृहमन्त्री उक्तवान् यत् ऑपरेशन सिन्दूर अभियानस्य समये, पाकिस्तानस्य प्रहारक्षमता नष्टा अभवत्, अभियानमिदं पाकिस्तानं जानुभ्यां स्थातुं च विवशम् अकरोत् । सः अवदत् यत् पाकिस्तानपक्षः भारतीयपक्षं प्रति अभियानं स्थगयितुं प्रार्थितवान्।

इत: पूर्वम्, पहलगामे जातस्य आतङ्काक्रमणस्य प्रतिक्रियारूपेण भारतस्य प्रबलस्य, सफलस्य निर्णायकस्य च आपरेशन् सिन्दूर इत्यस्य विषये राज्यसभायां चर्चायां भागम् गृहणन्, विदेशमन्त्री डा. एस्. जयशङ्करः आपरेशन् सिन्दूर इत्यस्य स्थगने मध्यस्थता-अभियोगान् निराकृतवान्, सः अवदत् यत् अस्मिन् वर्षे द्वाविंशति-एप्रिलतः षोडशजून-पर्यन्तं प्रधानमन्त्रिणा नरेन्द्रमोदिना, अमेरिकादेशस्य राष्ट्रपतिना डोनाल्ड् ट्रम्पेन सह कथञ्चिदपि दौरभाषिक-वार्तालापः न कृतः। सः अवदत् यत्, कोऽपि विश्वनेता भारतं तस्य कार्याणि स्थगयितुं नोक्तवानिति।

सः अवदत् यत्, अमेरिका-देशस्य उपराष्ट्रपतिना सह वार्तालापकाले भारतं स्वपक्षं स्पष्टम् अकरोत् यत् यदि पाकिस्तानः आक्रमणं करोति तर्हि भारतं महदाक्रमणं कृत्वा प्रतिक्रियां करिष्यतीति।

**प्रधानमंत्री किसान-सम्मान-निधि:**

प्रधानमंत्री किसान-सम्मान-निधि (पीएम-किसान) योजनान्तर्गतं विंशतितम-भागस्य विमोचनं शनिवासरे भविष्यति । अस्मिन् विषये ह्यः नवदिल्लीनगरे कृषिकृषक-कल्याणमन्त्री शिवराजसिंहचौहानस्य अध्यक्षतायां उच्चस्तरीयसभा आयोजिता। सभायां आयोजनस्य सज्जतायाः समीक्षा कृता, अस्या: योजनाया: लाभः अधिकाधिक-कृषकान् प्राप्नोति इति सुनिश्चितं च कृतम् । अस्य आयोजनस्य नेतृत्वं प्रधानमन्त्री नरेन्द्रमोदी उत्तरप्रदेशस्य वाराणसीनगरे करिष्यति । सभायां चौहानमहोदयेन अधिकारिभ्यः निर्देशः दत्तः यत् ते राष्ट्रिय-राज्य-मण्डल-ग्राम-स्तरेषु कृषकान् कार्यक्रमे योजयन्तु, तथा च सः राष्ट्रव्यापी-अभियानरूपेण कार्यक्रमममुम् आयोजयितुम् आह्वानं दत्तवान् ।

**भारत-अमेरिका-शुल्कम् ::**

भारतेन द्विपक्षीयव्यापारविषये अमेरिकायाः राष्ट्रपतिः डोनाल्ड ट्रम्पस्य, वक्तव्यस्य संज्ञानं गृहीतम् यत् सः अगस्तमासस्य प्रथमदिनात् आरभ्य भारतोपरि पञ्चविंशति-प्रतिशतं शुल्कस्य घोषणां कृतवान् । वाणिज्य-उद्योगमन्त्रालयेन विज्ञप्तौ उक्तं यत् सर्वकारः तस्य निहितार्थानाम् अध्ययनं कुर्वन् अस्ति। मन्त्रालयेन उक्तं यत्, सर्वकारः राष्ट्रहितं सुरक्षितुं आवश्यकानि सर्वाणि कार्याणि करोतीति ।

**क्रिकेट्-क्रीडा::**

क्रिकेट्-क्रीडायां पञ्च-क्रीडायाः एण्डर्सन्-तेण्डुल्कर-ट्राफीति पञ्च-टेस्ट्-क्रीडा-शृङ्खलायाम् अद्य लन्दन् नगरस्य ओवल-क्रीडाङ्गणे अन्तिम-निर्णायक-टेस्ट्-क्रीडायां भारतं इङ्ग्लैण्ड्-देशस्य विरुद्ध्यं क्रीडिष्यति । इयं क्रीडा अद्य सायं सार्धत्रिवादने आरप्स्यते । सम्प्रति भारतम् श्रृङ्खलायां एक -द्वे इति अंकानाम् अन्तरालेन पश्चात् स्थितं वर्तते ।

आहतस्य ऋषभपन्तस्य स्थाने ध्रुव-जुरेल् इत्यनेन सह प्रमुखपरिवर्तनं कृतम् अस्ति। अस्यां क्रीडायां भारतेन विजयीभूत्वा शृङ्खलायां समत्त्व-प्राप्तेः अपेक्षा वर्तते ।